শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ চতুঃপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুঃপঞ্চাশঃ সর্গঃ ॥

## ৱজ্রদংষ্ট্রাঙ্গদযোর্যুদ্ধমঙ্গদেন তস্য ৱধশ্চ

স্ৱবলস্য চ ঘাতেন অঙ্গদস্য বলেন চ।
রাক্ষসঃ ক্রোধমাৱিষ্টো ৱজ্রদংষ্ট্রো মহাবলঃ ॥ **6.54.1** ॥

ৱিস্ফার্য চ ধনুর্ঘোরং শক্রাশনিসমপ্রভম্।
ৱানরাণামনীকানি প্রাকিরচ্ছরৱৃষ্টিভিঃ ॥ **6.54.2** ॥

রাক্ষসাশ্চাপি মুখ্যাস্তে রথেষু সমৱস্থিতাঃ।
নানাপ্রহরণাঃ শূরাঃ প্রাযুধ্যন্ত তদা রণে ॥ **6.54.3** ॥

ৱানরাণাং চ শূরাস্তু তে সর্ৱে প্লৱগর্ষভাঃ।
অযুধ্যন্ত শিলাহস্তাঃ সমৱেতাঃ সমন্ততঃ ॥ **6.54.4** ॥

তত্রাযুধসহস্রাণি তস্মিন্নাযোধনে ভৃশম্।
রাক্ষসাঃ কপিমুখ্যেষু পাতযাঞ্চক্রিরে তদা ॥ **6.54.5** ॥

ৱানরাশ্চৈৱ রক্ষঃসু গিরিৱৃক্ষান্ মহাশিলাঃ।
প্রৱীরাঃ পাতযামাসুর্মত্তৱারণসন্নিভাঃ ॥ **6.54.6** ॥

শূরাণাং যুধ্যমানানাং সমরেষ্ৱনিৱর্তিনাম্।
তদ্ রাক্ষসগণানাং চ সুযুদ্ধং সমৱর্তত ॥ **6.54.7** ॥

প্রভিন্নশিরসঃ কেচিচ্ছিন্নঃ পাদৈশ্চ বাহুভিঃ।
শস্ত্রৈরর্দিতদেহাস্তু রুধিরেণ সমুক্ষিতাঃ॥ **6.54.8**॥

হরযো রাক্ষসাশ্চৈৱ শেরতে গাং সমাশ্রিতাঃ।
কঙ্কগৃধ্রবলাঢ্যাশ্চ গোমাযুকুলসঙ্কুলাঃ॥ **6.54.9**॥

কবন্ধানি সমুৎপেতুর্ভীরূণাং ভীষণানি ৱৈ।
ভুজপাণিশিরশ্ছিন্নাশ্ছিন্নকাযাশ্চ ভূতলে॥ **6.54.10**॥

ৱানরা রাক্ষসাশ্চাপি নিপেতুস্তত্র ভূতলে।
ততো ৱানরসৈন্যেন হন্যমানং নিশাচরম্॥ **6.54.11**॥

প্রাভজ্যত বলং সর্ৱং ৱজ্রদংষ্ট্রস্য পশ্যতঃ।
রাক্ষসান্ ভযৱিত্রস্তান্ হন্যমানান্ প্লৱঙ্গমৈঃ॥ **6.54.12**॥

দৃষ্টৱা স রোষতাম্রাক্ষো ৱজ্রদংষ্টঃ প্রতাপৱান্।
প্রৱিৱেশ ধনুষ্পাণিস্ত্রাসযন্ হরিৱাহিনীম্॥ **6.54.13**॥

শরৈর্ৱিদারযামাস কঙ্কপত্রৈরজিহ্মগৈঃ।
বিভেদ ৱানরাংস্তত্র সপ্তাষ্টৌ নৱ পঞ্চ চ॥ **6.54.14**॥

ৱিৱ্যাধ পরমক্রুদ্ধো ৱজ্রদংষ্ট্রঃ প্রতাপৱান্।
ত্রস্তাঃ সর্ৱে হরিগণাঃ শরৈঃ সঙ্কৃত্তদেহিনঃ।
অঙ্গদং সম্প্রধাৱন্তি প্রজাপতিমিৱ প্রজাঃ॥ **6.54.15**॥

ততো হরিগণান্ ভগ্নান্ দৃষ্টৱা ৱালিসুতস্তদা।
ক্রোধেন ৱজ্রদংষ্ট্রং তমুদীক্ষন্তমুদৈক্ষত॥ **6.54.16**॥

ৱজ্রদংষ্ট্রোঽঙ্গদশ্চোভৌ যোযুধ্যেতে পরস্পরম্।
চেরতুঃ পরমক্রুদ্ধৌ হরিমত্তগজাৱিৱ॥ **6.54.17**॥

ততঃ শতসহস্রেণ হরিপুত্রং মহাবলম্।
জঘান মর্ম্মদেশেষু শরৈরগ্নিশিখোপমৈঃ॥ **6.54.18**॥

রুধিরোক্ষিতসর্ব্বাঙ্গো ৱালিসূনুর্মহাবলঃ।
চিক্ষেপ ৱজ্রদংষ্ট্রায ৱৃক্ষং ভীমপরাক্রমঃ॥ **6.54.19**॥

দৃষ্টৱা পতন্তং তং ৱৃক্ষমসম্ভ্রান্তশ্চ রাক্ষসঃ।
চিচ্ছেদ বহুধা সোঽপি মথিতঃ প্রাপতদ্ ভুৱি॥ **6.54.20**॥

তং দৃষ্টৱা ৱজ্রদংষ্ট্রস্য ৱিক্রমং প্লৱগর্ষভঃ।
প্রগৃহ্য ৱিপুলং শৈলং চিক্ষেপ চ ননাদ চ॥ **6.54.21**॥

তমাপতন্তং দৃষ্টৱা স রথাদাপ্লুত্য ৱীর্যৱান্।
গদাপাণিরসম্ভ্রান্তঃ পৃথিৱ্যাং সমতিষ্ঠত॥ **6.54.22**॥

অঙ্গদেন শিলা ক্ষিপ্তা গৎৱা তু রণমূর্ধনি।
সচক্রকূবরং সাশ্ৱং প্রমমাথ রথং তদা॥ **6.54.23**॥

ততোঽন্যচ্ছিখরং গৃহ্য ৱিপুলং দ্রুমভূষিতম্।
ৱজ্রদংষ্ট্রস্য শিরসি পাতযামাস ৱানরঃ॥ **6.54.24**॥

অভৱচ্ছোণিতোদ্গারী ৱজ্রদংষ্ট্রঃ সুমূর্চ্ছিতঃ।
মুহূর্তমভৱন্মূঢো গদামালিঙ্গ্য নিঃশ্ৱসন্॥ **6.54.25**॥

স লব্ধসংজ্ঞো গদযা ৱালিপুত্রমৱস্থিতম্।
জঘান পরমক্রুদ্ধো ৱক্ষোদেশে নিশাচরঃ॥ **6.54.26**॥

গদাং ত্যক্ত্বা ততস্তত্র মুষ্টিযুদ্ধমকুর্ৱত।
অন্যোন্যং জঘ্নতুস্তত্র তাৱুভৌ হরিরাক্ষসৌ॥ **6.54.27**॥

রুধিরোদ্গারিণৌ তৌ তু প্রহারৈর্জনিতশ্রমৌ।
বভূৱতুঃ সুৱিক্রান্তাৱঙ্গারকবুধাৱিৱ॥ **6.54.28**॥

ততঃ পরমতেজস্বী অঙ্গদঃ প্লৱগর্ষভঃ।
উৎপাট্য ৱৃক্ষং স্থিতৱানাসীৎ পুষ্পফলৈর্যুতঃ॥ **6.54.29**॥

জগ্রাহ চার্ষভং চর্ম খড্গং চ ৱিপুলং শুভম্।
কিঙ্কিণীজালসঞ্ছন্নং চর্মণা চ পরিষ্কৃতম্॥ **6.54.30**॥

চিত্রাংশ্চ রুচিরান্ মার্গাংশ্চেরতুঃ কপিরাক্ষসৌ।
জঘ্নতুশ্চ তদান্যোন্যং নর্দন্তৌ জযকাঙ্ক্ষিণৌ॥ **6.54.31**॥

ৱ্রণৈঃ সাস্রৈরশোভেতাং পুষ্পিতাৱিৱ কিংশুকৌ।
যুধ্যমানৌ পরিশ্রান্তৌ জানুভ্যামৱনীং গতৌ॥ **6.54.32**॥

নিমেষান্তরমাত্রেণ অঙ্গদঃ কপিকুঞ্জরঃ।
উদতিষ্ঠত দীপ্তাক্ষো দণ্ডাহত ইৱোরগঃ॥ **6.54.33**॥

নির্মলেন সুধৌতেন খড্গেনাস্য মহচ্ছিরঃ।
জধান ৱজ্রদংষ্ট্রস্য ৱালিসূনুর্মহাবলঃ॥ **6.54.34**॥

রুধিরোক্ষিতগাত্রস্য বভূৱ পতিতং দ্বিধা।
তচ্চ তস্য পরীতাক্ষং শুভং খড্গহতং শিরঃ॥ **6.54.35**॥

ৱজ্রদংষ্ট্রং হতং দৃষ্টৱা রাক্ষসা ভযমোহিতাঃ।
ত্রস্তা হ্যভ্যদ্রৱন্ লঙ্কাং ৱধ্যমানাঃ প্লৱঙ্গমৈঃ।
ৱিষণ্ণৱদনা দীনা হ্রিযা কিঞ্চিদৱাঙ্মুখাঃ॥ **6.54.36**॥

নিহত্য তং ৱজ্রধরপ্রভাৱঃ
স ৱালিসূনুঃ কপিসৈন্যমধ্যে।
জগাম হর্ষং মহিতো মহাবলঃ
সহস্রনেত্রস্ত্রিদশৈরিৱাৱৃতঃ॥ **6.54.37**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে চতুঃপঞ্চাশঃ সর্গঃ॥